# CLASS – VIII- SANSKRIT

प्र॰1 निम्नलिखितवाक्येषु उचितपदैः रिक्तस्थानानि पूरयित्वा स्व-उत्तरपुस्तिकासु लिखत– (10)

(1) छात्राः क्रीडनाय उद्यानं ....................। (गच्छन्ति/गच्छतः/गच्छति)

(2) अहं .................... सह गमिष्यामि। (यूयम्/ तव/युष्माभिः)

(3) तस्य .................... श्वः विदेशात् आगमिष्यति। (पितुः/पितरम्/पिता)

(4) वयं सर्वे एव ईश्वरं ....................। (जानाति/जानीमः/जानामि)

(5) एषः अश्वः तस्मात् .................... तीव्रतरः। (अश्वेन/अश्वे/अश्वात्)

(6) मम कक्षायाम् (52) .................... छात्राः सन्ति। (द्वौपञ्चाशत्/द्विपञ्चाशत्/द्वापञ्चाशत्)

(7) धनिकाय दानं ....................। (दिवा/वृथा/बहिः)

(8) धिक् राष्ट्रस्य ....................। (शत्रुः/शत्रून्/शत्रोः)

(9) एतत् पुस्तकं .................... न अस्ति। (माम्/ मम/ मया)

(10) .................... नाम किम् अस्ति? (त्वम्/त्वया/तव)

प्र॰2 उचित शब्दरूपैः रिक्तस्थानानि पूरयत– (6)

| | | |
|---|---|---|
| (1) राज्ञे | .................... | .................... |
| (2) .................... | .................... | शशिभिः |
| (3) माम् | .................... | .................... |
| (4) .................... | .................... | यूयम् |
| (5) .................... | .................... | पितृणाम् |
| (6) बाले | .................... | .................... |

प्र॰3 उचित धातुरूपैः रिक्तस्थानानि पूरयत– (6)

| | | |
|---|---|---|
| (1) .................... | .................... | पठन्तु |
| (2) गच्छेत् | .................... | .................... |
| (3) .................... | .................... | जानीथ |
| (4) .................... | पास्यथः | .................... |
| (5) अस्मि | .................... | .................... |
| (6) .................... | .................... | अजानन् |

प्र॰4 अधोलिखित संख्याभ्य: संख्यावाचीपदान् लिखत– (3)

51, 55, 63, 77, 79, 72

प्र॰5 मञ्जूषात: उचित-अव्यय-पदानि चित्वा रिक्त-स्थानानि पूरयत– (3)

सह, सम्यक्, प्राक्, मा, दिवा, बहि:

(1) कदापि असत्यं .................... वद।

(2) विद्याहीन: .................... अपि न पश्यति।

(3) अवकाशात् .................... सा कथम् आगमिष्यति।

(4) अहं स्वमात्रा .................... मातुलगृहं गमिष्यामि।

(5) .................... वर्षा भवति।

(6) भवान् .................... वदति, भवान् मम हितं वाञ्छति।

प्र॰6 सन्धि, सन्धिच्छेदं वा कुरुत– (3)

(1) अवश्यं पृच्छ (2) तस्य + एव

(3) बालकम् + पश्य (4) गुरु + उपदेश:

(5) नैव (6) सु + उक्ति:

प्र॰7 णिजन्त-धातूनाम् उचितरूपै: रिक्त-स्थानानि पूरयत– (2½)

(1) सुधांशु: द्विचक्रिकां ....................। (चालय्)

(2) माता शिशुं फलं ....................। (खादय्)

(3) शिक्षका: तान् शस्त्रिय-संगीतम् अपि ....................। (शिक्षय्)

(4) तौ सेवकौ कार्यं ....................। (कारय्)

(5) वयं श्वेतवस्त्राणि ....................। (धारय्)

प्र॰8 विशेषणपदै: सह विशेष्यपदानां मेलनं कुरुत– (2½)

| विशेषणपदानि | विशेष्यपदानि |
|---|---|
| (1) एषा | सूक्तिम् |
| (2) एष. | सङ्कल्प: |
| (3) उच्चतर: | सूक्तिम् |
| (4) एकाम् | चटका |
| (5) गुरुतरा | पिता |

प्र॰9 कान्निचित् दशप्रश्नानां एकपदेन उत्तरत– (10)

(1) अस्मान् क: रक्षति। (गुरु:/ शिक्षक:/ पिता)

(2) शिक्षां क: प्राप्नोति? (विद्यार्थी/ सुखार्थी)

(3) स्वास्थ्याय विचारा: कीदृशा: भवेयु ? (शोभना:/ उच्चा:/ शुद्धा:)

(4) मध्यमा: किम् इच्छन्ति? (मानम्/ धनम्/ धनमानौ)

(5) जन: किम् ब्रूयात्? (सत्यम्/ असत्यम्/ अप्रियम्)

(6) गजराज: कस्या: सेवाम् अकरोत्? (मातृभूमे:/ मातु:/ वनभूमे:)

(7) राजा कम् अमुञ्चत्। (दूतम्/ सैनिकम्/ श्वेतगजम्)

(8) ए॰ पी॰ जे॰ अब्दुलकलाम-आजाद: किं वाद्ययन्त्रं वादयति? (तबलाम्/ गिटारम्/ वीणाम्)

(9) पिता कस्मात् उच्चतर: भवति? (स्वर्गात्/ भूमे:/ खात्)

(10) सदाचारेण किं शोभते? (वाणी/ सृष्टि:/ जीवनम्)

(11) विद्यासमं किं न भवति? (तप:/ चक्षु:/ सुखम्)

**प्र॰10 कानिचित् षड्प्रश्नानां उत्तरं पूर्णवाक्येन दीयताम्–** **(12)**

(1) मातृभूमि: अस्मभ्यं किं किं करोति?

(2) राजगुरवे शिखा कस्य चिह्नम् आसीत्?

(3) सूर्य: कदा-कदा रक्त: भवति?

(4) चन्द्रयान-परियोजनायां किं संस्थानं कार्यरतम् अभवत्?

(5) ए॰ पी॰ जे॰ अब्दुलकलाम-आजाद: केषां प्रेरणास्रोतम् अस्ति?

(6) प्रतिवर्षं कुत्र गजोत्सव: भवति?

(7) यथा बीजम्, तथा क: भवति?

(8) प्रतिदिनं कस्य अभ्यास: आवंश्यक: अस्ति।

**प्र॰11 उचितविभक्ति पदै: रिक्त-स्थानानि पूरयत–** **(6)**

(1) एतानि पत्राणि ………………… यच्छ। (मम/ मह्यम्/ माम्)

(2) ………………… मधुर: कुशलतम:। (बालकेषु/ बालकात्/ बालकेन)

(3) ………………… समं सुखं नास्ति। (त्यागम्/ त्यागात्/ त्यागेन)

(4) तव ………………… नाम किम्। (पिता/ पितु:/ पितरम्)

(5) मम ………………… एतानि पुस्ताकानि यच्छ। (भ्रात्रे/ भ्रातरि/ भ्रातु:)

(6) एष: अश्व: तस्मात् ………………… तीव्रतर:। (अश्वेन/ अश्वात्/ अश्वस्य)

**प्र॰12 रेखाङ्क्तिपदानि आधृत्य प्रश्ननिर्माणं कुरुत–** **(5)**

(1) <u>समुद्रेषु</u> वृष्टि: वृथा। (कासु/ केषु/ के)

(2) <u>चटका</u> स्वशिशवे अन्नं आनयति। (क:/ का:/ का)

(3) स: अस्माकं राष्ट्रपति: अस्ति। (कासाम्/ केषाम्/ केषु)

(4) मधुरवचनेन सर्वे तुष्यन्ति। (के/ केन/ केषु)

(5) जनः सदा सत्यं वदेत्। (कः/ किम्/ कम्)

प्र॰13 श्लोकानाम् अंशानां मेलनं कुरुत– (5)

| | |
|---|---|
| (1) वृथा वृष्टिः समुद्रेषु | काको नक्तम् न पश्यति। |
| (2) दिवा पश्यति नोलूकः | शास्त्रं तस्य करोति किम्? |
| (3) प्रिय-वाक्य-प्रदानेन | महतामेकरूपता। |
| (4) सम्पत्तौ च विपत्तौ च | वृथा तृप्तस्य भोजनम्। |
| (5) यस्य नास्ति स्वयं प्रज्ञा | सर्वे तुष्यन्ति मानवाः। |

प्र॰14 रेखांकित-क्रियापदानां कर्तृपदानि लिखत– (4)

(1) धनिकः मुद्राः विन्दन्ति।

(2) नापितः शिखां कृन्तति।

(3) तेनालीरामः नातितेन सह प्रविशति।

(4) यद् आज्ञापयति महाराजः।

प्र॰15 पदानाम् अर्थैः सह मेलनम् कुरुत– (4)

| | |
|---|---|
| काठिन्येन | असत्यम् |
| अनृतम् | जलम् |
| तोयम् | कठिनतया |
| अहर्निशम् | दिने च रात्रौ च |

प्र॰17 विपरीतार्थकपदानि लिखत– (5)

(1) प्रियम् (2) अनृतम्

(3) अधमाः (4) दुर्जनः

(5) अशान्तः

प्र॰18 रेखांकित-कर्तृपदानां क्रियापदानि लिखत– (3)

(1) सज्जनः शान्तिम् आप्नुयात्।

(2) मुक्तः च अन्यान् विमोचयेत्।

(3) सुखार्थी वा त्यजेत् विद्याम्।